# महाकविः अम्बिकादत्तव्यासः तस्य साहित्यकृतिश्च।

## महाकविः अम्बिकादत्तव्यासः

राजस्थानप्रदेशस्य जयपुरमण्डले धूलानामके ग्रामे व्यासमहोदयानां पूर्वजा अवसन्। पराशरगोत्रीयः यजुर्वेदीयः त्रिप्रवरः पण्डितप्रवरः राजारामः धूलाग्रामं परित्यज्य काशीमाजगाम। तस्य द्वौ पुत्रौ आस्ताम्। दुर्गादत्तः देवीदत्तश्च। दुर्गादत्तस्यैव धीमतः द्वितीयः पुत्रः आसीत् अम्बिकादत्तव्यासः। १९१५ विक्रमाब्दे अर्थात् १८५८ ख्रीष्टाब्दे चैत्रशुक्लाष्टम्यां तिथौ जयपुराख्ये स्थाने अम्बिकादत्तव्यासस्य जन्म अभवत्। काशीनगर्य्याम् तस्य शिक्षा अभवत्। १८८० ख्रीष्टाब्दे सः साहित्याचार्यपदवीं लव्धवान्। बिहारप्रान्तस्य मधुवनी-भागलपुर-छपरा-पटाना-नामकेषु स्थानेषु व्यासमहाशयः छात्रान् अध्यापयामास। १९०० ख्रीष्टाव्दे अम्बिकादत्तव्यासः काश्याम् शिवसायुज्यम् अवाप। अम्बिकादत्तव्यासः सामवतनाटके स्वपरिचयं प्रस्तुवन्नाह-

जातो जयपुरनगरे वाराणस्यां तथा कलितविद्यः।
सत्वरकवितासविता गौडः कोऽप्यम्बिकादत्तः॥

महापुरुषेण अनेन संस्कृतभाषायाम् रचितानां ग्रन्थानां संख्या चतुर्दश विद्यन्ते। अवतार -मीमांसा-कारिका, कथाकुसुमम्, गुप्ताशुद्धिप्रदर्शनम्, दुःखद्रुमकुठारः, धर्माधर्मकलकलम्, पातञ्जलप्रतिबिम्बम्, प्राकृतविचित्रशब्दार्थकोषः, बालव्याकरणम्, मित्राऽऽलाभः, शिवराजविजयः, संस्कृताभ्यासपुस्तकम्, सहस्रनामरामायणम्, साङ्ख्यसागरसुधा, सामवतम् चेति।

अयं महानुभावो हिन्दीभाषायामपि साहित्यं रचयति स्म। नाटकं काव्यं गद्यं समस्यापूर्तिम् आत्मकथां चालिखत्। भारतेन्दुसभायाश्च अन्यतमः सदस्यः आसीत् व्यासमहाशयः। संस्कृतस्य प्रचाराय यथा विहार-संस्कृत-सञ्जीवन-समाजस्य स्थापना कृता तद्वत् अनेन हिन्दीभाषायाः प्रचाराय ६४ संख्यकानाम् ग्रन्थानां रचनापि कृता।

## शिवराजविजयः

शिवराजविजयाख्ये कथाकाव्ये ऐतिहासिककाव्ये वा विरामत्रयम् विद्यते। तत्रापि प्रत्येकं विरामे चत्वारः निःश्वासाः अध्यायाः वा प्राप्यन्ते। भारतवर्षस्य दक्षिणप्रदेशे मुगलशासकानां आधिपत्यम् आसीत्, तथा तेषाम् अत्याचारेण हिन्दवः अत्याचारिताः आसन्। तदर्थं मुगलानां शासनात् देशस्य स्वतन्त्रार्थं महाराष्ट्रस्य अधीश्वरेम शिवाजीमहोदयेन मौगलैः सह संघर्षः प्रारब्धः। अस्मिन् समये तेन निर्मितेषु आश्रमेषु योद्धारः ब्रह्मचारिणः वेशमादाय मोहम्मदीयानां गमनागमनं प्रत्यक्षीकुर्वन्ति स्म। एवं क्रमेण शिवाजीमहोदयेन यदा विजयः प्राप्यते तदा उद्विग्नः सन् विजापुरस्य दरवारतः तस्य पराजयार्थं अफजलखाँ महोदयः प्रेषितः। अस्मिन् एव अवसरे कश्चित् यवनः गुप्तचरः बीजापुरदुर्गतः पत्रम् आनीतवान् यत् जीवितावस्थायाम् एव शिवजीमहोदस्य वलादानयनम् कर्तव्यम्। आगमनसमये तेन यवनगुप्तचरेण काचित् ब्राह्मणकन्या अपहृता, ततश्च गौरसिंह-श्यामसिंहभ्याम् सा रक्षिता, यवनगुप्तचरश्च व्यापादितः। अथ तत्पत्रं प्राप्य शिवाजीमहोदयः सर्वं गूढं रहस्यं विज्ञाय आफजलखाँ-महाभागम् आहूतवान्। गोपीनाथमहाभागं च सन्ध्यर्थम् वीजापुरदरवारं प्रति सम्प्रेषितवान्। एवंक्रमेण कस्मिंश्चित् दिवसे शिवाजीमहाराजेन सह आफजलखाँ महाभागस्य यदा मिलनम् अभवत् शिवाजीमहाराजः

खाँमहाशयस्य सर्वं दुरभिसन्धिं पूर्वतः एव विदित्वा आलिङ्गनसमये कवचेन वाघनखेन तं खाँमहाशयं व्यापादितवान्। एवं क्रमेण अन्येषामपि विषयाणां वर्णनं अत्र समुपलभ्यते।

शिवराजविजये परम्परागतशैलीम् आश्रित्य रसयोजना प्रकृतिवर्णनं, मानवीयसौन्दर्यवर्णनं, अलङ्कारयोजना, अन्यानि च काव्यतत्त्वानि समाविष्टानि, अर्वाचीनशैलीम् आश्रित्य च चरित्रचित्रण-कथोपकथन-कथानकयोजनादीनि प्रयुक्तानि। एवम् अयमुपन्यासः प्राचीनार्वाचीनशैल्यौः सङ्गमस्थलम्। अत्र वर्णेषु वाक्ययोजनायां च बाणभट्टस्य प्रभावः। क्वचिद् वाक्येषु दीर्घता क्वचिच्च लघुता। भाषा प्राञ्जला प्रसादगुणोपेता प्रवाहमयी च। तद्यथा इत इतो गौरसिंह! उपविश, उपविश चिराय दृष्टोऽसि, अपि कुशलं कलयसि? अपि कुशलिनः तव सहवासिनः। अभ्यंगीकृतमहाव्रतं निर्वहत यूयम्। अपि कश्चन नूतनो वृत्तान्तः। कविः चरित्रचित्रणे सफलः। शिवराजे नायकोचिताः सर्वे गुणाः सन्ति। स धीरोदात्तो नायकः। स वीरो नम्रो दयावान् मर्यादायाः स्वतन्त्रतायाश्च रक्षकः। तमेव परिवृत्य उपन्यासस्य कथावस्तु प्रसृतम्।

ऐतिहासिके कथानके कल्पनाया अपि मिश्रणं वर्तते। संवादा स्वाभाविकाः सरलाः प्रकरणानुकूलाः पात्राणां विविधमनोवृत्तीनां परिचायकाश्च सन्ति।

प्रकृतिचित्रणे तु व्यासः अभिनवो बाणः। तेन प्रकृते विविधरूपाणां शब्दचित्राणि प्रस्तुतानि। प्रकृतेः सौन्दर्यम् आलम्बनत्वेन उद्दीपनत्वेन् च वर्णितम्। अलङ्कारप्रयोगस्तु चमत्कारजनकः। शब्दार्थालङ्काराः यथावसरं नैपुण्येन प्रयुक्ताः। उपमायां यमकालङ्कारस्य रमणीयः प्रयोगो

यथा- "यदीयचित्रपूरदुर्गा परसहस्राः क्षत्रियकुलांगनाः, शारदा इव विशारदाः, अनसूया इवानसूया, यशोदा इव यशोदाः, सत्या इव सत्याः, रूक्मिण्य इव रूक्मिण्यः, सुवर्णा इव सुवर्णाः।"